N.A.

Ramayan : Ayodhyay Kanda

रामायण : अयोध्या काण्ड

Sanskrit

Paper - Handwritten

N.A. (Very old)

30 Folio

8.1"X4.4"

Incomplete

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

रामायण:
अयोध्या काण्ड

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

श्रीगणेशायनमः श्रीमहादेवउवाच एकदासुखमासीनंरा
मंस्वांतःपुराजिरे सर्वाभरणसंपन्नंरत्नसिंहासनेस्थितम् १
नीलोत्पलदलश्यामंकौस्तुभामुक्तकंधरम् सीतयारत्नदंडेनचा
मरेणाथवीजितम् २ विनोदयंतंतांबूलचर्वणादिभिरादरा
त् नारदोऽवतरद्दृष्टंमंबराद्यत्ररावघः ३ शुद्धस्फटिकसं

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

अ॰रा॰ काशः शरच्चन्द्र इवामलः अतर्कितमुपायातो नारदो दिव्यदर्श अयो॰
१ नः ४ तं दृष्ट्वा सहसोत्थाय रामः प्रीत्या कृतांजलिः ननाम शि
रसा भूमौ सीतया सह भक्तिमान् ५ उवाच नारदं रामः प्रीत्या
परमया युतः संसारिणां मुनिश्रेष्ठ दुर्लभं तव दर्शनम् ६ अ १
स्माकं विषयासक्तचेतसां नितरां मुने अवाप्तं मे पूर्वजन्म॰

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

कृतपुण्यमहोदयैः संसारिणाऽपिहिमुनेलभ्यतेसत्समागमः
७ अतस्त्वद्दर्शनादेवकृतार्थोस्मिमुनीश्वर किंकार्यंतेमया
कार्यंब्रूहितत्करवाणिभो ८ अथतंनारदोप्याहराघवंभक्तव
त्सलम् किंमोहयसिमांराममवाक्यैर्लौकानुसारिभिः ९ सं
सार्यहमितिप्रोक्तंसत्यमेतत्त्वयाविभो जगतामादिभूता

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

अ०रा० यासामायागृहिणीतव १० त्वत्संनिकर्षाज्जायंतेतस्यांब्रह्मादयःप्र अयो०

२ जाः त्वदाश्रयासदाभातिमाययात्रिगुणात्मिका ११ सूतेऽजस्रंशुक्ल

कृष्णलोहिताःसर्वदाप्रजाः लोकत्रयमहागेहेगृहस्थस्त्वमुदाहृतः

१२ त्वंविष्णुर्जानकीलक्ष्मीःशिवस्त्वंजानकीशिवा ब्रह्मात्वंजा

नकीवाणीसूर्यस्त्वंजानकीप्रभा १३ भवान्शशांकःसीतातुरो २

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

हिणीशुभलक्षणा शक्रस्त्वमेवपौलोमीसीतास्वाहाऽनलोभवान् १४

यमस्त्वंकालरूपश्चसीतासंयमिनीप्रभो निर्ऋतिस्त्वंजगन्नाथतामः

सीजानकीशुभा १५ रामत्वमेववरुणोभार्गवीजानकीशुभा

वायुस्त्वंरामसीतातुसदागतिरितीरिता १६ कुबेरस्त्वंरामसि

तासर्वसंपत्प्रकीर्तिता रुद्राणीजानकीप्रोक्तारुद्रस्त्वंलोकशेनो

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

अ०रा० कृतं १७ लोकेस्त्रीवाचकंयावत्तत्सर्वंजानकीशुभा पुन्नामवाच्य अयो०
३ कंयावत्तत्सर्वंत्वंहिराघव १८ तस्माल्लोकत्रयेदेवयुवाभ्यांनास्ति०
किंचन १९ त्वदाभासोदिताज्ञानमव्याकृतिमितीर्यते तस्मान्महां
स्ततःसूत्रंलिंगंसर्वात्मकंततः २० अहंकारश्चबुद्धिश्चपंचप्राणेन्द्रि ३
याणिच लिंगमित्युच्यतेप्राज्ञैर्जन्ममृत्युसुखादिमत् २१ सए

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

वजीवसंज्ञश्च लोकेभातिजगन्मयः अवाच्यानाद्यविद्यैवकारणो
पाधिरुच्यते २२ स्थूलंसूक्ष्मंकारणाख्यमुपाधित्रितयंचितेः एतैः
विशिष्टोजीवःस्याद्वियुक्तःपरमेश्वरः २३ जाग्रत्स्वप्नसुषुप्त्याख्या
संसृतिर्याप्रवर्तते तस्याविलक्षणःसाक्षीचिन्मात्रस्त्वंरघूत्तम २४
त्वत्तएवजगज्जातंत्वयिसर्वंप्रतिष्ठितम् त्वय्येवलीयतेकृत्स्नंतः

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

अ॰रा॰ स्मात्त्वंसर्वकारणं २९ रज्जावहिमिवात्मानंजीवंज्ञात्वाभयंभवेत् अयो॰
४ परात्माहमितिज्ञात्वाभयदुःखैर्विमुच्यते २५ चिन्मात्रज्योतिषासर्वाः सर्वदेहेषुबुद्धयः त्वयायस्मात्प्रकाश्यंतेसर्वस्यात्मातततोभवान् २७ अज्ञानाध्यस्यतेसर्वंत्वयिरज्जौभुजंगवत् त्वज्ज्ञा ४
नाल्लीयतेसर्वंतस्माज्ज्ञानंसदाभ्यसेत् २८ त्वत्पादभक्तियुक्ता

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

नं विज्ञानं भवति क्रमात् तस्मात्त्वद्भक्तियुक्ता ये मुक्तिभाजस्त एव
हि २९ अहं त्वद्भक्तभक्तानां तद्भक्तानां च किंकरः अतो मामनुगृ
ह्णीष्व मोहयस्व न मां प्रभो ३० त्वन्नाभिकमलोत्पन्नो ब्रह्मा मे जनकः
प्रभो अतस्तवाहं पौत्रोऽस्मि भक्तं मां पाहि राघव ३१ इत्युक्त्वा ब
हुशो नत्वा स्वानंदाश्रुपरिप्लुतः उवाच वचनं रामं ब्रह्मणा नोदि

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

अ०रा० तोऽस्म्यहम् ३२ रावणस्यवधार्थायजातोऽसिरघुसत्तम इदानीं अयो०
५ राज्यरक्षार्थंपितात्वामभिषेक्ष्यति ३३ यदिराज्याभिसंसक्तो
रावणंनहनिष्यसि प्रतिज्ञातेकृतारामभूभारहरणायवै ३४
तत्सत्यंकुरुराजेंद्रसत्यसंधस्त्वमेवहि श्रुत्वैतद्गदितंरामोना
रदंप्राहसस्मितं ३५ शृणुनारदमेकिंचिद्विद्यतेविदितंक्वचि ६

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

तु प्रतिज्ञातं चयत्पूर्वं करिष्येतन्नसंशयः ३६ किंतुका
लानुरोधेन तत्तप्रारब्धसंक्षयात् हरिष्ये सर्वभूभारं क्रमेणास्क
रमंडलं ३७ रावणस्य विनाशार्थं श्वोगंतादंडकाननम् चतुर्द
शसमास्तत्र त्वृषिर्त्वामुनिवेषधृक् ३८ सीतामिषेण तं दुष्टं
सकुलं नाशयाम्यहम् एवं रामे प्रतिज्ञाते नारदः प्रमुमोद ह ३९

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

अ॰रा॰ प्रदक्षिणत्रयंकृत्वादंडवत्प्रणिपत्यतम् अनुज्ञातश्चरामेणय॰ अयो॰

६ योदेवगतिंमुनिः ४० संवादंपठतिशृणोतिसंस्मरेद्वायोनित्यं

मुनिवररामयोःसभक्त्या संप्राप्नोत्यमरसुदुर्लभंविमोक्षंकैव

ल्यंविरतिपुरःसरंक्रमेण ४१ इतिश्रीमदध्यात्मरामायणेउ॰

मामहेश्वरसंवादे अयोध्याकांडेप्रथमःसर्गः १ ७ ७ ॥ ६

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

श्रीमहादेवउवाच अथराजादशरथः कदाचिद्गृहसिस्थितः
वसिष्ठंस्वकुलाचार्यमाहूयेदमभाषत १ भगवन् राममखिल
लाः प्रशंसंतिमुहुर्मुहुः पौराश्चनैगमावृद्धामंत्रिणश्चविशेषतः
२ ततः सर्वगुणोपेतंरामंराजीवलोचनं ज्येष्ठंराज्येभिषेक्ष्या
मिवृद्धोहंमुनिपुंगव ३ भरतोमातुलंद्रष्टुंगतः शत्रुघ्नसंयु

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

अ०रा० तः अभिषेक्ष्येऽश्वएवाशफ्रभवास्तद्यानुमोदताम् ४ संभाराः अ०का०
७ संभ्रियंताचगच्छमंत्रयराघवम् उच्छ्रीयंतांपताकाश्चनानाव
र्णाःसमंततः ९ तोरणानिविचित्राणिस्वर्णमुक्तामयानिवै
आहूयमंत्रिणंराजासक्रमंत्रंमंत्रिसत्तमम् ६ आज्ञापयतियः
द्यत्वांमुनिस्तत्त्समानय यौवराज्येऽभिषेक्ष्यामिश्वोभूते ७

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

रघुनंदनम् ७ तथेतिहर्षात्समुनिंकिंकरोमीत्यभाषत तमुवाच

महातेजावसिष्ठोज्ञानिनांवरः ८ श्वःप्रभातेमध्यकक्षेकन्यकाःस्व

र्णभूषिताः तिष्ठंतुषोडशगजःस्वर्णरत्नादिभूषितः ९ चतुर्दंतः

समायातुऐरावतकुलोद्भवः नानातीर्थोदकैःपूर्णाःस्वर्णकुंभाःसह

स्रशः १० स्थाप्यंतांनववैव्याघ्रचर्माणिभीणिचानय श्वेतछ

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

अ॰रा॰ त्रंरत्नदंडं मुक्तामणिविराजितम् ११ दिव्यमाल्यानिवस्त्राणि॰ अ॰कां
९ दिव्यान्याभरणानि च मुनयः सत्कृतास्तत्र तिष्ठंतु कुशपाणयः
१२ नर्तक्यो वारमुख्याश्च गायका वेणुकास्तथा नानावादित्रकु
शला वादयंतु नृपांगणे १३ हस्त्यश्वरथपादाता बहिस्तिष्ठंतु ९
सायुधाः नगरे यानि तिष्ठंति देवतायतनानि च १४ तेषु प्रव

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

र्तं तां पूजां नानाबलिभिरादरतां राजानः शीघ्रमायांतु नानोपायनपा

णयः १५ इत्यादिश्य मुनिः श्रीमान् स्वमंत्रं नृपमंत्रिणम् स्वयं ज

गाम भवनं राघवस्यातिशोभनम् १६ रथमारुह्य भगवान् वसिष्ठो

मुनिसत्तमः त्रीणि कक्षाण्यतिक्रम्य रथात् क्षितिमवातरत् १७

अंतः प्रविश्य भवनं स्वाचार्यत्वादवारितः गुरुमागतमाज्ञाय राम

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

अ०रा० स्तूर्णंकृतांजलिः १८ प्रत्युद्गम्यनमस्कृत्यदंडवद्भक्तिसंयुतः स्व अं०का
१ र्णपात्रेणपानीयमानिनायाशुजानकी १९ रत्नासनेसमाश्य
पादौप्रक्षाल्यभक्तितः तदापःशिरसाधृत्वासीतयासहराघ
वः २० धन्योस्मीत्यब्रवीद्रामस्तवपादांबुधारणात् श्रीरा
मेणैवमुक्तस्तुप्रहसन्मुनिरब्रवीत् २१ त्वत्पादसलिलंधृत्वा १

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

धन्योभूद्गिरिजापतिः ब्रह्मापिमत्पितातेहि पादतीर्थहताशुभः

२२ इदानींभाषसेयत्त्वंलोकानामुपदेशकृत् जानामित्वांपरा

त्मानंलक्ष्म्यासंजातमीश्वरम् २३ देवकार्यार्थसिद्ध्यर्थंभक्तानां

मुक्तेश्च भक्तिसिद्धये रावणस्यवधार्थायजातंजानामिराघव

२४ तथापिदेवकार्यार्थंगुह्यंनोद्घाटयाम्यहम् यथात्वंमायया

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

अ०रा० सर्वंकरोषिरघुनंदन २५ तथैवानुविधास्येऽहंशिष्यस्त्वंगुरुरप्यहं अ यो

१० गुरुर्गुरूणांत्वंदेवपितॄणांत्वंपितामहः २६ अंतर्यामीजगद्यात्रा

वाहकस्त्वमगोचरः शुद्धसत्त्वमयंदेहंधृत्वास्वाधीनसंभवम् २७

मनुष्यइवलोकेऽस्मिन्भासित्वंयोगमायया पौरोहित्यमहंजाने

विगर्ह्यंदुष्यजीवनम् २८ इक्ष्वाकूणांकुलेरामःपरमात्माजर १०

निष्यतेइतिज्ञातंमयापूर्वंब्रह्मणाकथितंपुरा २९ ततोऽहमाशयाराम
तवसंबंधकांक्षया अकार्षंगर्हितमपितवाचार्यत्वसिद्धये ३० ततो
मनोरथोमेऽद्यफलितोरघुनंदन त्वदधीनामहामायासर्वलोकैकमो
हिनी ३१ मांयथामोहयन्नैवतथाकुरुरघूद्वह गुरुनिष्कृतिका
मस्त्वंयदिदेह्येतदेवमे ३२ प्रसंगात्सर्वमप्युक्तंनवाच्यंकुत्रचिन्म

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

अ॰रा॰ या राज्ञा दशरथेनाहं प्रेषितोऽस्मि रघूद्वह ३३ त्वामामंत्रयितुं रा अयो॰
११ ज्येष्ठोऽभिषेक्ष्यति राघव अद्य त्वं सीतया सार्द्धमुपवासं यथाविधि
३४ कृत्वा शुचिर्भूमिशायी भव राम जितेंद्रियः गच्छामि राजसा
न्निध्यं त्वं तु प्रातर्गमिष्यसि ३५ इत्युक्त्वा रथमारुह्य ययौ राजगुरु
र्द्रुतम् रामोऽपि लक्ष्मणं दृष्ट्वा प्रहसन्निदमब्रवीत् ३६ सौमित्रे॰ ११

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

यौवराज्येमेश्वोऽभिषेकोभविष्यति निमित्तमेवाहंकर्ताभोक्तात्वं
मेवहि ३७ ममत्वंहिबहिःप्राणोनात्रकार्याविचारणा ततोवसिष्ठे
नयथाभाषितंतत्तथाकरोत् ३८ वसिष्ठोपिन्नृपंगत्वास्तंसर्वंन्य
वेदयत् वसिष्ठस्यपुरोराज्ञाह्यक्तंरामाभिषेचनम् ३९ यदातदै
वनगरेश्रुत्वाकश्चित्पुमान्जगौकौसल्यायैराममात्रेसुमित्रायै

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

अ॰रा॰ तथैवच ४० श्रुत्वातेहर्षसंपूर्णददतुर्हारमुत्तमम् तस्मैततःप्रीत अयो॰
१२ मनाःकौसल्यापुत्रवत्सला ४१ लक्ष्मींपर्यचरद्देवींरामस्यार्थप्र
सिद्धये सत्यवादीदशरथःकरोत्येवप्रतिश्रुतम् ४२ कैकयीवश
गःकिंतुकामुकःकिंकरिष्यति इतिव्याकुलचित्तासादुर्गांदेवी
मपूजयत् ४३ एतस्मिन्नंतरेदेवादेवींवाणीमचोदयन् गच्छ १२

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

देविभुवोलोकमयोध्यायांप्रयत्नतः ४४ रामाभिषेकविघ्नार्थंय
तस्वब्रह्मवाक्यतः मंथरांप्रविशस्वादौकैकेयींचततःपरम् ४५ त
तोविघ्नेसमुत्पन्नेपुनरेहिदिवंशुभे तथेत्युक्त्वातथाचक्रेप्रविवेशा
थमंथराम् ४६ साऽपिकुब्जात्रिवक्रातुप्रासादाग्रमथारुहत्
नगरंपरितोदृष्ट्वासर्वतःसमलंकृतम् ४७ नानातोरणसंबाधं

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

अ०रा० पताकाभिरलंकृतं सर्वोत्सवसमायुक्तं विस्मितापुनरागमत् ४८ अयो०
१३ धात्रीपप्रच्छमातः किंनगरंसमलंकृतम् नानोत्सवसमायुक्ता
कौसल्याचातिहर्षिता ४९ ददातिविप्रमुख्येभ्योवस्त्राणिवि
विधानिच तामुवाचतदाधात्रीरामचंद्राभिषेचनम् ५० श्वोभ
विष्यतितेनाद्यसर्वत्पोऽलंकृतंपुरम् तच्छुत्वात्वरितंगत्वाकै १३

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

केयींवाक्यमब्रवीत् ५१ पर्यंकस्थांविशालाक्षीमेकांतेपर्यवस्थि
ताम् किंशेषेदुर्भगेमूढेमहद्भयमुपस्थितम् ५२ नजानीषेतिसौ
दर्यमानिनीमत्तगामिनी ५३ रामस्यानुग्रहाद्राज्ञःश्वोभिषेको
भविष्यति तच्छ्रुत्वासहसोत्थायकैकेयीप्रियवादिनी ५४ तस्यै
दिव्यंददौस्वर्णनूपुरंरत्नभूषितम् हर्षस्थानेकिमितिमेकथ्यतेभ

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

अ०रा० यमागतम् ९५ भरतादधिकोरामः प्रियकृन्मेप्रियंवदः कौस अयो०
१४ त्व्यांमांसमंपश्यन्सदाशुश्रूषतेहिमाम् ९६ रामाद्वयंकिमाप
न्नंतवमूढेवदस्वमे तच्छ्रुत्वा विषसादाथकुब्जाकारणवैरिणी
९७ शृणुमद्वचनंदेवियथार्थंतिमहद्भयं त्वांतोषयन्सदाराजाप्रि
यवाक्यानिभाषते ९८ कामुकोतथ्यवादीचत्वांवाचापरितो १४

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

षयन् कार्यं करोति तस्या वै राममातुः सुपुष्कलम् ५९ मनस्येतन्नि
धायैव प्रेषयामास तेसुतम् भरतं मातुलकुले प्रेषयामास सानुज
म् ६० सुमित्रायाः समीचीनं भविष्यति न संशयः लक्ष्मणो राऽ
ममन्वेति राज्यं सोनुभविष्यति ६१ भरतो राघवस्याग्रे किंकरोऽ
वा भविष्यति विवास्यते वा नगराप्राणैर्वा हाप्यते चिरात् ६२

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

अ॰रा॰ त्वंतुदासीवकौसल्यांनित्यंपरिचरिष्यसि ततोऽपिमरणंश्रेयोय अयो॰
१९ त्सपत्न्याःपराभवः ६३ अतःशीघ्रंयतस्वाद्यभरतस्याभिषेच
ने रामस्यवनवासार्थंवर्षाणिनवपंचच ६४ ततोरूढोऽभये
पुत्रस्तवज्ञिभविष्यति उपायंतेप्रवक्ष्यामिपूर्वमेवस्रु निश्चितं
६५ पुरादेवासुरेयुद्धेराजादशरथःस्वयं इंद्रेणयाचितोध॰ १९

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

न्वीसहायार्थंमहारथः ६६ जगामसेनयासार्द्ध(त्वयासहशशाननने
युद्धंप्रकुर्वतस्तस्यराक्षसैःसहधान्विनः ६७ तदाक्षकीलोन्यपत
च्छिन्नस्तस्यनवेदसः त्वंतुहस्तंसमावेश्यकीलरंध्रेतिधैर्यतः ६८
स्थितवत्यसितापांगीपतिप्राणपरीप्सयाततोहत्वाऽसुरानुद्दं(द
र्श)त्वामरिंदमः ६९ आश्चर्येपरमंलेभेत्वामालिंग्यमुदान्वितः

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

अ॰रा॰ वृणीष्वयत्तेमनसिवांछितंवरदोऽस्म्यहम् ७० वरद्वयंवृणीष्व अयो॰
१६ त्वमेवंराजाऽवदत्स्वयम् त्वयोक्तोवरदोराजन्यदिदत्तंवरद्वयं
७१ त्वय्येवतिष्ठतुचिरंन्यासभूतंममानघ यदामेवसरोभूयात्त॰
दादेहिवरद्वयं ७२ तथेत्युक्त्वास्वयंराजामंदिरंव्रजसुव्रते त्व
त्तः श्रुतंमयापूर्वमिदानींस्मृतिमागतम् ७३ अतःशीघ्रंप्रव १६

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

श्यायक्रोधागारंरुषान्विता विमुच्यसर्वाभरणंसर्वतो विनिकीर्यः
यच भूमावेवशयानात्वंतुष्णीमातिष्ठभामिनि ७४ यावत्सत्यं
प्रतिज्ञायराजाभीष्टंकरोतिते श्रुत्वात्रिवक्रयोक्तंत तदाकैकेयनं
दिनी ७५ तथ्यमेवाखिलंमेनेदुःसंगाहितविभ्रमा तामाहकै
कयीदुष्टाकुतस्तेबुद्धिरीदृशी ७६ एवंत्वांबुद्धिसंपन्नांनजा

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

अ॰रा॰ नेबुक्रस्कंदरि भरतोयदिराजामेभविष्यतिसुतःप्रियः ७७ ग्रा अयो॰
१७ मानूशतंप्रदास्यामिममत्वंप्राणवल्लभा इत्युक्त्वाकोपभवनंप्र
विश्यसहसारुषा ७८ विमुच्यसर्वाभरणंपरिकीर्यसमंततः
भूमौशयानामलिनामलिनांबरधारिणी ७९ प्रोवाचशृणुमे
कुब्जेयावद्रामोवनंव्रजेत् प्राणांस्त्यक्ष्येऽथवावक्षेशयिष्ये १७

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

तावदेवहि ८० निश्चयंकुरुकंल्याणिकल्याणंतेभविष्यति इत्यु

क्ताप्रययौकुब्जागृहंसापितथाकरोत् ८१ धीरोऽप्यंतदयान्वितोऽ

पिसद्गुणाचारान्वितोवाथवानीतिज्ञोविधिवाददेशिकपरोविद्या

विवेकोथवा दुष्टानामतिपापभावितधियांसंगंसदाचेद्भजेत्तद्बु

द्ध्यापरिभावितोव्रजतितत्साम्यंक्रमेणस्फुटम् ८२ अतःसंगः

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

अ॰रा॰ परित्याज्योदुष्टानांसर्वदैवहि दुःसंगीच्यवतेस्वार्थाद्यथेयंराज॰ अयो॰
१६ कंन्यका ८३ इतिश्रीमदध्यात्मरामायणेउमामहेश्वरसंवादेअ
योध्याकांडेद्वितीयःसर्गः २ श्रीमहादेवउवाच ततो
दशरथोराजारामाभ्युदयकारणात् आदिश्यमंत्रिप्रकृतीःसानं १८
दोगृहमाविशत् १ तत्राहृष्ट्वा प्रियांराजाकिमेतदितिविह्वलः

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

यापुरामंदिरंतस्याःप्रविष्टेमयिशोभना २ हसंतीमामुपायातिसा९

किंनैवाद्यदृश्यते इत्यात्मन्येवसंचिंत्यमनसातिविदूयता ३ पत्र

च्छदासीनिकरंकुतोवःस्वामिनीशुभा नायातिमांयथापूर्वमप्रि

याप्रियदर्शना ४ ताऊचुःक्रोधभवनंप्रविष्टानैवविद्महे कारणं९

तत्रदेवत्वंगत्वानिश्चेतुमर्हसि ५ इत्युक्तोभयसंत्रस्तोराजात

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

अं०रा० स्याःसमीपगः उपविश्यशनैर्देहं स्पृशन्वैपाणिनाब्रवीत् ६ किंशो० अयो०
३९ षेवसुधापृष्ठेपर्यंकादीन्विहायच मांत्वंखेदयसेभीरुयतोमांना
वभाषसे ७ अलंकारंपरित्यज्यभूमौमलिनवाससा किमर्थं
ब्रूहिसकलंविधास्येतववांछितम् ८ कोवातवाहितंकर्ताना
रीवापुरुषोऽपिवा समेदंडयश्चवध्यश्चभविष्यतिनसंशयः ९ ३९

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

ब्रूहि देवि यथा प्रीतिस्तदवश्यं ममाग्रतः तदिदानीं साधयिष्ये
स्कदुर्लभमपि क्षणात् १० जानासि त्वं मम स्वांतं प्रियं मां स्वव
शे स्थितम् तथापि मां खेदयसे वृथा तव परिश्रमः ११ ब्रूहि कं
धनिनं कुर्यां दरिद्रं ते प्रियंकरम् धनिनं क्षणमात्रेण निर्धनं च त
वाहितम् १२ ब्रूहि कं वा वधिष्यामि वधार्हो वा विमोक्ष्यते

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

अ·रा· किमत्रबहुनोक्तेनप्राणान्दास्यामितेप्रिये १३ ममप्राणात्प्रि अयो·
२० यतरोरामोराजीवलोचनः तस्योपरिशपेब्रूहित्वद्धितंतत्करो
म्यहम् १४ इतिब्रुवाणंराजानंशपंतंराघवोपरि शनैर्विमृ
ज्यनेत्रेसाराजानंप्रत्यभाषत १५ यदिसत्यप्रतिज्ञोऽसिश
पथंकुरुषेयदि याच्ञांमेसफलांकर्तुंशीघ्रमेवत्वमर्हसि १६ २०

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

पूर्वंदेवासुरेयुद्धेमयात्वंपरिरक्षितः तदावरद्वयंदत्तंत्वयामेतुष्टचे
तसा १७ तद्वयंन्यासभूतंमेस्थापितंत्वयिसुव्रत तत्रैकेनवरेणा
शुभरतंमेप्रियंसुतम् १८ एभिःसंभृतसंभारैर्यौवराज्येभिषे
चय अपरेणवरेणाशुरामोगच्छतुदंडकान् १९ मुनिवेषध
रःश्रीमानुजटावल्कलभूषणः चतुर्दशसमास्तत्रकंदमूलफला

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

अ॰रा॰ शनः २० पुनरायातु तस्यां ते वने वा तिष्ठतु स्वयं प्रभाते गच्छतु अयो॰
२१ वनं रामो राजीवलोचनः २१ यदि किंचिद्विलंबेत प्राणांस्त्यक्ष्ये
तवाग्रतः भव सत्यप्रतिज्ञस्त्वं मेतदेव मम प्रियम् २२ श्रुत्वैतद्दा
रुणं वाक्यं कैकेय्या रोमहर्षणं निपपात महीपालो वज्राहत इवा
चलः २३ शनैरुन्मील्य नयने विमृज्य परया भिया दुःस्वप्नो २१

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

वामयादृष्टोह्यथवाचित्तविभ्रमः २४ इत्यालोक्यपुरःपत्नीं
व्याघ्रीमिवपुरःस्थिताम् किमिदंभाषसेभद्रेममप्राणहरंव
चः २५ रामःकमपराधंतेकृतवान्कमलेक्षणः ममाग्रेरा
घवगुणान्वर्णयस्यनिशंशुभान् २६ कौसल्यांमांसमंप
श्यन्शुश्रूषांकुरुतेसदा इतिब्रुवंतीत्वंपूर्वमिदानींभाषसेन्य

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

अ॰रा॰ था २७ राज्यं गृहाण पुत्राय रामस्तिष्ठतु मंदिरे अनुगृह्णीष्व मां वा अयो॰

२२ मेरामा भास्ति भयं तव २८ इत्युक्त्वाश्रुपरीताक्षः पादयोर्निपपात

तह कैकेयी प्रत्युवाचेदं सापिरक्तांतलोचना २९ राजेंद्र किं त्वं

भ्रांतोसि उक्तं तद्भाषसेन्यथा मिथ्याकरोषि चेत्स्वीयं भाषितं

नरको भवेत् ३० वनं नगच्छेद्यदि रामचंद्रः प्रभातकाले जिन २२

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

चीरयुक्तः उद्बंधनंवाविषभक्षणंवाकृत्वामरिष्येपुरतस्तवाऽहम्
३१ सत्यप्रतिज्ञोऽहमितीहलोके विडंबसेसर्वसभांतरेषु रामोऽ
परित्वंशपथंचकृत्वामिथ्याप्रतिज्ञोनरकंप्रयाहि ३२ इत्युक्तः-
प्रिययादीनोमग्नोदुःखार्णवेनृपः मूर्च्छितःपतितोभूमौविसंज्ञो
मृतकोयथा ३३ एवंरात्रिर्गतातस्यदुःखात्संवत्सरोपमा

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

अ॰रा॰ अरुणोदयकालेतुबंदिनोगायकाजगुः ३४ निवारयित्वातान् अयो॰
२३ सर्वान्कैकेयीरोषमास्थिता ततःप्रभातसमयेमध्यकक्षमुपस्थि
ताः ३५ ब्राह्मणाःक्षत्रियावैश्याऋषयःकन्यकास्तथा छत्रंच
चामरंदिव्यंगजोवाजीतथैवच ३६ अन्याश्चवारमुख्यायाः
पोरजानपदास्तथा वसिष्ठेनयथाज्ञप्तंतत्सर्वंतत्रसंस्थितं ३७ २३

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

स्त्रियोबालाश्चवृद्धाश्चरात्रौनिद्रांनलेभिरे कदाद्रक्षामहेरामं
पीतकौशेयवाससं ३८ सर्वाभरणसंपन्नंकिरीटकटको-
ज्ज्वलं कौस्तुभाभरणंश्यामंकंदर्पशतसुंदरम् ३९ अभि
षिक्तंसमायातंगजारूढं स्मिताननम् श्वेतछत्रधरंतत्रलक्ष्म
णंलक्षणान्वितम् ४० रामंकदावाद्रक्ष्यामःप्रभातंवाक

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

अ०रा० दाभवेत् इत्युत्सुकधियःसर्वेबभूवुःपुरवासिनः ४१ नेदानी अयो०
२४ मुत्थितोराजाकिमर्थंचेतिचिंतयन् सुमंत्रःशनकैःप्रायाद्यत्र
राजावतिष्ठते ४२ वर्द्धयन्जयशब्देनप्रणमंच्छिरसानृपम्
अतिखिन्नंनृपंदृष्ट्वाकैकेयीसमपृच्छत ४३ देविकैकयिवर्द्ध २४
स्व किंराजादृश्यतेऽन्यथा तमाहकैकेयीराजारात्रौनिद्रांनल

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

ध्यवान् ४४ रामरामेतिरामेतिराममेवानुचिंतयन् प्रजागरे
णवैराजाह्यस्वस्थइवलक्ष्यते राममानयशीघ्रंत्वंराजाद्रष्टुमिहे
च्छति ४५ सुमंत्रउवाच अश्रुत्वाराजवचनंकथंगच्छा
मिभामिनि तच्छ्रुत्वामंत्रिणोवाक्यंराजामंत्रिणमब्रवीत् ४६
सुमंत्ररामंद्रक्ष्यामिशीघ्रमानयसुंदरम् इत्युक्तस्त्वरितंगत्वा

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

अ॰रा॰ सुमंत्रोराममंदिरम् ४७ अवारितःप्रविष्टोयंत्वरितंरामम अयो॰
२५ ब्रवीत् शीघ्रमागच्छभद्रंतेरामराजीवलोचन ४८ पितुर्गेह
मयासार्द्धं राजात्वांद्रष्टुमिच्छति इत्युक्तोरथमारुह्यसंभ्रमा
त्त्वरितोययौ ४९ रामःसारथिनार्द्धंलक्ष्मणेनसमन्वितः मध्य
कक्षेवसिष्ठादीन्पश्यन्नेवत्वरान्वितः ५० पितुःसमीपंसंगम्य २५

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

ननाम चरणौ पितुः राममालिंगितुं राजा समुत्थाय ससंभ्रमः
९१ बाहू प्रसार्य रामेति दुःखान्मध्ये पपात ह हाहेति रामस्तं शी
घ्रमालिंग्यांकेन्यवेशयत् ९२ राजानं मूर्च्छितं दृष्ट्वा चुक्रुशुः स
र्वयोषितः किमर्थं रोदनमिति वसिष्ठोऽपि समाविशत् ९३
रामः पप्रच्छ किमिदं राज्ञो दुःखस्य कारणं एवं पृच्छति रामे सा कै

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

अ०रा० केयीराममब्रवीत् ९४ त्वमेवकारणंत्वत्रराज्ञोदुःखोपशांतये अयो०
२६ किंचित्कार्यंत्वयारामकर्तव्यंनृपतेर्हितम् ९५ कुरुसत्यप्रतिज्ञं
त्वंराजानंसत्यवादिनम् राज्ञावरद्वयंदत्तंममसंतुष्टचेतसा ९६
त्वदधीनंतुतत्सर्वंवक्तुंत्वांलज्जतेनृपः २ सत्यपाशेनसंबद्धंपि
तरंत्रातुमर्हसि ९७ पुत्रशब्देनचैतद्धिनरकात्त्रायतेपिता २६

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

रामस्तयोदितंश्रुत्वाशूलेनाभिहतोयथा ५८ व्यथितःकैकयींप्रा
हकिंमामेवंप्रभाषसे पित्रर्थेजीवितंदास्येपिबेयंविषमुल्बणम्
५९ सीतांत्यक्ष्येऽथकौसल्यांराज्यंचापित्यजाम्यहम् अनाज्ञ
प्तोऽपिकुरुतेपितुःकार्यंसउत्तमः ६० उक्तःकरोतियःपुत्रःसम
ध्यमउदाहृतः उक्तोपिकुरुतेनैवसपुत्रोमलउच्यते ६१ अतञ्च

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

अ० रा० रोमितत्सर्वंयन्मामाह पितामम ॥ सत्यंसत्यंकरोम्येवरामोद्विर्ना
२७ भिभाषते ६२ इतिरामप्रतिज्ञांसाश्रुत्वावक्तुंप्रचक्रमे रामत्व
दभिषेकार्थसंभाराःसंभृताश्चये ६३ तैरेवभरतोऽवश्यमभि
षेच्यःप्रियोमम अपरेणवरेणाशु चीरवासाजटाधरः ६४
वनंप्रयाहिशीघ्रंत्वमद्यैवपितुराज्ञया चतुर्दशसमास्तत्रव

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

समुन्यन्नभोजनः ६५ एतदेवपितुस्तेद्यकार्यंत्वंकर्तुमर्ह

सि राजातुलज्जतेवक्तुं त्वामेवरघुनंदन ६६ श्रीरामउवा

च भरतस्यैवराज्यंस्यादहंगच्छामिदंडकान् किंतुराजानवक्ती

हमांनजानेऽत्रकारणं ६७ श्रुत्वैतद्रामवचनंदृष्वारामंपुरः

स्थितम् प्राहराजादशरथोदुःखितोदुःखितंवचः ६८ स्त्री

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

अ॰रा॰ जितं भ्रांतहृदयमुन्मार्गपरिवर्तिनम् निगृह्य मां गृहाणेदं राज्यं अयो॰
२९ पापं न तद्भवेत् ६९ एवं चेदनृतं नैव मां स्पृशेद्रघुनंदन इत्यु
क्त्वा दुःखसंतप्तो विललाप नृपस्तदा ७० हा राम हा जग
न्नाथ हा मम प्राणवल्लभ मां विसृज्य कथं घोरं विपिनं गंतु २९
मर्हसि ७१ इति रामं समालिंग्य मुक्तकंठो रुरोद ह विमृ

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

ज्यनयनेरामः पितुःसजलपाणिना ७२ अभ्यासयामा

सन्तर्पंशनैःसनयकोविदः किमत्वदुःखेन विभोराज्यंशा

स्तुमेऽनुजः ७३ अहंप्रतिज्ञांनिस्तीर्यपुनर्यास्यामितेपु

रम् राज्यात्कोटिगुणंसौख्यंममराजन्वनेसतः ७४ त्व

त्सत्यपालनंदेवकार्यंचापिभविष्यति कैकेय्याश्चप्रियो

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

अ०रा० राजन्वनवासो महागुणः ७५ इदानीं गंतुमिच्छामि व्ये० अयो०

२९ तुमातुश्च हृज्वरः संभाराश्चोपक्लृप्यंतामभिषेकार्थमा

गताः ७६ मातरं च समाश्वास्य अनुनीय च जानकीम् आ

गत्य पादौ वंदित्वा तव यास्ये सुखं वनं ७७ इत्युक्त्वा तु प

रिक्रम्य मातरं द्रष्टुमाययौ कौसल्यापि हरेः पूजां कुरुते रा २९

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

नावसरःकृतः दंडकागमनेशीघ्रंममकालोऽद्यनिश्चितः ४
कैकेयीवरदानेनसत्यसंधःपितामम भरतायददौराज्यंममा
प्यारण्यमुत्तमम् ५

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

मकारयात् ७८ होमचकारयामासब्राह्मणेभ्योददौधनम्
ध्यायतेविष्णुमेकाग्रमनसामौनमास्थिता ७९ अंतस्थमेकं
घनचित्प्रकाशंनिरस्तसर्वातिशयस्वरूपम् विष्णुंसदानं
दमयंहृदब्जेसाभावयंतीनददर्शरामम् ८० इतिश्रीमदध्या
त्मरामायणेउमामहेश्वरसंवादेअयोध्याकांडेतृतीयःसर्गः ३

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

अ॰रा॰ श्रीमहादेवउवाच ततःसुमित्रादृष्ट्वैनंरामंराज्ञींससंभ्रमा अयो॰
३० कौसल्यांबोधयामासरामोऽयंसमुपस्थितः १ श्रुत्वैवरामना
मैषाबहिर्दृष्टिःप्रवाहिता रामंदृष्ट्वाविशालाक्षमालिंग्यांकेन्यवे
शयत् २ मूर्ध्न्यवघ्रायपस्पर्शगात्रंनीलोत्पलछवि भुंक्ष्वपुत्रे
तिचप्राहमिष्टमन्नंक्षुधार्दितः ३ रामःप्राहनमेमातर्भोज ३०

CC-0.Jangamwadi Math Collection. Digitized by eGangotri